[ப-ரை] (1) எவருடைய (வீட்டில்) (2) சிவலிங்க பூஜை, (3-4) இல்லையோ, (5) எவருடைய (வீட்டில்) (6) ஜபம் ஹோமம் முதலியன (7-8) இல்லையோ, (எவருடைய வீட்டில்) (9) சிவபெருமானிடம் பக்தி, (இல்லையோ) (10-11) சிந்தனைகள் இருக்கின்றனவோ, (12-13) அங்கேயே (14) அச்சமின்றி (15) நீர் பிரவேசிக்கலாம்.

2 3 4 5 6 7 8 9 10
अतिथिः श्रोत्रियो वापि गुरुर्वा वैष्णवोऽपि वा ।
12 13 1 11 14 15 16
न सन्ति यद्गृहे गावः सभार्यस्त्वं समाविश ॥ २४ ॥

அதிதி: ச்ரோத்ரியோ வாபி குருர்வா வைஷ்ணவோபி வா ।
ந ஸந்தி யத்க்ருஹே காவ: ஸபார்யஸ்த்வம் ஸமாவிச ॥

[ப-ரை] (1) எவருடைய வீட்டில், (2) விருந்தினராவது (3-4-5) வேதங்களைக் கற்றறிந்தவராவது, (6-7) குருவாவது, (8-9-10) திருமாலடியாராவது (11) பசுமாடாவது (12-13) இல்லையோ (அங்கு) (14) மனைவியுடன் (15) நீர் (16) பிரவேசிக்கலாம்.

2 3 1 5 6 7
बालानां प्रेक्षमाणानां यत्रा दत्त्वा त्वभक्षयन् ।
4 8 9 10 11 12
भक्ष्याणि तत्र संहृष्टः सभार्यस्त्वं समाविश ॥ २५ ॥

பாலாநாம் ப்ரேக்ஷமாணாநாம் யத்ராதத்வா த்வபக்ஷயன் ।
பக்ஷ்யாணி தத்ர ஸம்ஹ்ருஷ்ட: ஸபார்யஸ்த்வம் ஸமாவிச ॥

[ப-ரை] (1) எந்த வீட்டில் (2) குழந்தைகள் (3) பார்த்துக் கொண்டிருக்கும் பொழுது (4) தின்பண்டங்களை (5-6) அவர்களுக்குக் கொடுக்காமலே (7) மற்றவர்கள் உட்கொள்கின்றனரோ (8) அங்கு (9) மிகவும் ஸந்தோஷமடைந்தவராய் (10) மனைவியுடன் (11) நீர் (12) பிரவேசிக்கலாம்.

3 2 4 5 6 7
अनभ्यर्च्य महादेवं वासुदेवमथापि वा ।
9 8 1 10 11 12
अहुत्वा विधिवद्यत्र तत्र नित्यं समाविश ॥ २६ ॥

அனப்யர்ச்ய மஹாதேவம் வாஸுதேவமதாபி வா ।
அஹுத்வா விதிவத்யத்ர தத்ர நித்யம் ஸமாவிச ॥

[ப-ரை] (1) எந்த வீட்டில் (2) மஹாதேவனை (3) பூஜிக்காமல் (4-5-6-7) அல்லது வாஸுதேவனைப் பூஜிக்காமல் (8) முறைப்படி (9) ஹோமம் செய்யாமல்

॥ श्रीः ॥

॥ तृतीयोऽङ्कः ॥

(ततः प्रविशत्यासनस्थो माधवः बलदेवप्रभृतयश्च)

बलदेवः— अहो! कक्ष्यान्तरे कळकळ इव श्रूयते ।

माधवः— क कोऽत्र भोः ?

(प्रविश्य)

दौवारिकः— जेदु देवो । [जयतु देवः]

माधवः— कोऽयं कळकळः ?

दौवा — देवदंसणाहिळासिणो इसिणो दुवारं अहिचिठ्ठंति ।

[देवदर्शनाभिलाषिण ऋषयो द्वारमधितिष्ठन्ति ।]

बलदेवः — अनभिव्यञ्जितार्थं पद्यमेकमापद्यते ।

(सर्वे दत्तकर्णाश्शृण्वन्ति)

(नेपथ्ये)

चन्द्रोऽहमिति मानेन चन्द्रिकावारणं शशी ।
अंबुदेन न जानाति जगतस्तद्भाग्यता ॥ १ ॥

(आकर्ण्य सर्वे चिन्तां नाटयन्ति)

माधवः—(सखेदं) संप्रति मां प्रत्येव जगत्पालनपराङ्मुखतापराधबोधनाय पद्यमिदं पठ्यते । अतो दुस्सहोऽयं राजभावः । तथाहि;

व्यतनुत चरमाङ्गे हन्त कण्डूविनोदं
मम विबुधसमाजैर्घूर्णितो मन्दराद्रिः ।
अपि मणिघुटिकाऽऽसीद्यस्य गोवर्धनाद्रिः
क्षितिवलयमनेन क्षम्यते नैव वोढुम् ॥ २ ॥

उद्धवः— **विश्वंभर! कथं विश्वं वोढुं हा हन्त! खिद्यसे ।**
दधाति दुर्भरं गर्भं गर्भिण्याः क इवापरः ॥ ३ ॥

बलदेवः— **अधिजठरमसह्यैर्गाढ[1]मौर्वाग्निकीलै-**
रुपरि खरमरीचेरर्चिषा तप्तपूरः ।
[2]अयि! जलधरपीतोऽप्यब्धिरुज्झेन्न वृद्धिं
प्रकृतिरियमनूना पश्य! गाम्भीर्यभाजाम् ॥ ४ ॥

माधवः—(सामोदं) प्रवेश्यन्तां दर्शनाकांक्षिणः पारिकांक्षिणः ।

---

1. मौर्व्याग्नि—क. पाठः । 2. अधि—'ख' पाठः ।

दौवा— तथा (इति निष्क्रान्तः)

(ततः प्रविशन्ति दौवारिकेण सह तापसाः)

दौवा— एष देवः प्रागेव सिंहासनादुत्थितः परिपालयति भवतामागमनम् ।

मुनयः— मायामानुषवेषो विहाय वैकुण्ठमेष वैकुण्ठः ।
यदुवंशभागधेयं यमिनां भाग्येन धरणिमध्यास्ते ॥ ५ ॥

एवमेव हि श्रूयते;

कल्याणी बत गाथेयं लौकिकी प्रतिभाति मा ।
एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ ६ ॥

माधवः—आर्यमिश्रानभिवादये ।

मुनयः—(हस्तमुद्यम्य) जयन्ति जठरे यस्य जगन्ति, कमला वधूः ।
आदिमध्यान्तरहितस्स कथं पद्माशिषाम् ॥ ७ ॥

माधवः—(स्मितं कृत्वा) अपि कुशलमत्रभवताम् ?

मुनयः— वयं कुशलिनस्सर्वे त्वयि रक्षति शार्ङ्गिणि ।

माधवः—अपि तपो वर्धते ?

मुनयः— अन्यत्र भौमान्नरकान्नरकास्तपसा जिताः ॥ ८ ॥

माधवः—किमनेन नरकासुर[1]बाधाबोधनाय समागताः ?

मुनयः— दहराभ्रचरोऽसि देहिनां त्वमजानन्निव दानवान्तक! ।
परिपृच्छसि तेन तं प्रति [2]प्रतिघः पूर्णफलः प्रतीयते ॥ ९ ॥

तथापि नस्तत्पराभवातिभूमिरेव मुखरयति । अवधानं दीयताम् ।

माधवः—अवहितोऽस्मि ।

मुनयः—बाधते नरशमधनानिति [3]किं विस्मयाय ? यद्गुत;

सदसि मुनिवधूभिस्सास्रकण्ठीभिरुक्ता
"जननि! यजनकाले बाधते यायजूकान्" ।
इति झटिति पिधत्ते हन्त! हन्तेति कर्णा-
वदिति[4]रपहृताभ्यां कुण्डलाभ्यां ह्रियैव ॥ १० ॥

अपरः— अनागसोऽप्यातपवारणे हृते
वसुप्रवर्षिण्यमुनामरद्विषा ।

---

1. बाध-ख पाठः । 2. प्रतिघः=कोपः । 3. किन्तु-ख पाठः । 4. 'अदितिरुपहृताभ्यां-क पाठः । तदा, अपहारभयात् आत्मनैव पूर्वतरं उपहारत्वेन तस्मै समर्पिताभ्यामित्यर्थः ।

विवर्णतामेति मुखेन्दुमण्डलं
प्रतापतापातिशयात्प्रचेतसः ॥ ११ ॥

अन्यः— एकं दाशरथिर्व्यशोषयदपां राशिं, भुजै रावण-
शैलश्चैकमकम्पयत्स्वयमिति प्राप्ताभ्यसूयोदयः ।
सर्वाम्भोनिधिशोषणाय सकलक्षोणीभृदुत्पाटने-
ष्वुद्युक्तो विरमत्यसौ परिभवाशङ्की स्वमातुस्ततः ॥ १२ ॥

इतरः— नालीकनाभ ! नगरं नरकासुरेण
नीता बलेन समरेष्वपनीतभावाः ।
त्वत्प्राप्तये ज्वलितपञ्चशराग्निमध्य-
मध्यासते नृपसुतास्तपसा सुमध्याः ॥ १३ ॥

माधवः—अतश्श्रेयसे खलु तपस्विनामागमनम् । येन नरकासुरशासनमपि कल्याणाय कल्पते । साधयन्तु भवन्तः ।

मुनयः — विजयस्व (इति निष्क्रान्ताः)

माधवः — (चिन्तां नाटयति)

बल — माधव ! किमिदमवनतमुख[1]पुण्डरीकाक्षिन्नयासि ?

माधवः — भगवन् !

पूर्वापरसमीराभ्यां नीयमानेव नौर्बलात् ।
अनतिक्रमणीयाभ्यां कार्याभ्यामाकुलं मनः ॥ १४ ॥

बल — किमिव कार्यद्वितयम् ?

माधवः —प्रतिश्रुतं प्रियायै पारिजातानयनम् । आर्येभ्योऽपि नरक[2]निर्गन्धनम् । उभयमप्यनतिक्रमणीयम् । किमत्र प्रतिकर्तव्यम् ?

बल — इष्टजनप्रियाहते किमन्यदनतिक्रमणीयम् ?

माधवः — (उद्धवं प्रति) किमत्र मतमत्रभवतः ?

उद्धवः— त्वमेव वेत्सि कार्याणामनतिक्रमणीयताम् ।
उदर्कफलहेतूनां साध्यसाधनतामपि ॥ १५ ॥

माधवः—(स्मितं कृत्वा) नाद्यापि समागतो नरकासुरबन्दीकृतयौवतोदन्तजिज्ञासया प्रेषितो राजहंसः ।

(प्रविश्य)

दौवारिकः—देव ! आअओ राअहंसो । [देव आगतो राजहंसः]

1. पुण्डरीकं क पाठः । 2. निर्गन्धनम् = मारणम् ।

माधवः—कथमवरुध्यते? अविलम्बितं प्रवेशय।

दौवारिकः—तह [तथा] (इति निष्क्रम्य तेन सह प्रविश्य) [1]एसो राअहंसो [एष राजहंसः]

(इति निष्कान्तः)

राजहंसः—जेदु देवो [जयतु देवः]

(इत्युदीर्य पत्रिकां ददाति)

माधवः— (गृहीत्वा वाचयति)

[2]अहिणंदेइ खु चंदो आळोएहिं असेसवत्थूणि।
मोत्तूण [3]महोप्पलिणिं एत्थ विही एव्व वअणिज्जो॥ १६॥
[अभिनन्दयति खलु चन्द्रः आलोकैरशेषवस्तूनि।
मुक्त्वा महोत्पलिनीं अत्र विधिरेव वचनीयः॥]
चंदस्स वल्लहाओ बहुवीओ होंति पमदाओ।
अहिलसइ तं कुमुइणी सहाव एसो खु सअळविळआणं॥ १७॥
[चन्द्रस्य वल्लभा बह्वयो भवन्ति प्रमदाः।
अभिलषति तं कुमुदिनी स्वभाव एष खलु सर्वविलासिनीनाम्॥]

(संस्कृतमाश्रित्य)

असृजदमृतसारैराहृतैरब्जधामा
वदनमनुपमानन्से यदासौ शशाङ्कः।
तपति तपनरोचिस्सङ्गमादम्बुमूर्ति-
श्शिशिरय हृदयं मे शीतशीतैरपाङ्गैः॥ १८॥
विधुरयमतिघोरो वह्निरौर्वाभिमन्त-
र्जठरमपि दधानस्सन्ततं दुग्धसिंधुः।
कथति न यदमुष्यालोकतो ह्यभ्युपैति
कथनमहह! चक्रद्वंद्वविश्लेषहेतोः॥ १९॥
प्रकृतिरीक्षणयोर्न हि रूक्षता शिशिरता च नरस्य तु तन्मयि।
अकरुणोऽसि [4]कठोरतया विधोः [5]कमलकैरवकान्तविलोचन॥ २०॥
विरहिजनविषाणामाकरो मारुतानां
मलयगिरिरमुष्मात्प्रापिता दाक्षिणाशाम्।

---

1. आअदो क पाठः। 2. आणंदेइ पाठान्तरम्। 3. महोत्पलिनी=पद्मिनी। 4. कठोरता= पूर्णता (दारुणता च) 5. कमलकान्तः = सूर्यः, कैरवकान्तः = चन्द्रः, तावेव विलोचने यस्य तस्य संबुद्धिः।

सुचिरमनशना यज्ञानकी राक्षसेन
प्रियमपि पुनरागाज्जीवितं धारयन्ती ॥ २१ ॥

माधवः — (विचार्य) अनुरागोऽप्यनुरूपरूपधेयानामभिलाषपदम् ।

राज — 'एषा चित्रपटी' (इति दर्शयति)

माधवः — (निर्वर्ण्य) अहो ! अनिरूप्यमासामाभिरूप्यम् । तथा हि;

मुखकान्तिमनोजदीर्घिकाया [1]जलनीली किमरालकुन्तलालिः[2] ।
नमितोन्नमितान्तरा तरङ्गैरवगाहैकपदी नु मध्यरेखा ॥ २२ ॥
अतिक्रामेन्न मर्यादां वेणी काळफणीति किम् ।
मनोभूमान्त्रिकेणास्यास्त्रिरेखी लिखिताळिके[3] ॥ २३ ॥

[4]दृङ्मीनयोर्गतिविदोऽध्वनि कर्णपाश-
यन्त्रान्तराळपतनं प्रविशङ्क्य रोद्धुम् ।
विस्तारिताविव विशेषकमीनकेतो-
र्बाहू भ्रुवौ विलसतो वनितामणीनाम् ॥ २४ ॥

एतासां [5]त्रिणतां भ्रुवोर्युगमिदं संमृष्टवर्णान्तरां
भूयस्तद्ग्रहणेन लोचनरुचिं मौर्वीं निबंधान्नयन् ।
नासावंशशरं स्मरः कृतशिखाफालार्धचंद्रं मुहुः
कर्षन्विश्वजयाय किन्नु यतते संत्यज्य पौष्पं धनुः ॥ २५ ॥

[6]सीमन्तान्तरकीलकीलितलसत्फालातिभारानम-
त्कोटिद्वंद्वतुलालताग्रविसरद्रोचिर्गुणालंबिनोः ।
सौन्दर्यं तुलयन् समं सुमधनुर्नाडिंधमोऽङ्गेष्वमा-
वेतामां निदधाति किं विधुशिलापात्रीभवद्गण्डयोः ॥ २६ ॥

गोवर्धनोद्धरणकेळिचणं विचार्य
मां जेतुमात्मभुजसारपरीक्षणाय ।

---

1. जलनीली = शैवालम् । 2. कुन्तलाली ख पाठः । 3. अळिके = ललाटे । 4. दृङ्मीनयोः कर्णपाशयन्त्रान्तरालपतनं प्रविशङ्क्य (तौ) रोद्धुं अध्वनि विस्तारितौ बाहू इव वनितामणीनां भ्रुवौ विलसतः इत्यन्वयः । 5. त्रिणता-धनुः । भ्रुवोर्युगं धनुष्ट्वेन, लोचनरुचिः ज्यात्वेन, नासादण्डः शरत्वेन. फालं शराग्रवर्त्यर्धचन्द्रत्वेन च रूप्यते । नासाग्रे पतन्ती लोचनद्वयकान्तिः आकृष्यमाणां सशरां ज्यां अनुकरोतीव । 6. सीमन्तान्तरं = सीमन्तस्य मध्यप्रदेशः स एव घटाकीलः तत्र कीलिता बद्धा फालमेव तुलालता तस्याः कोटिद्वंद्वं अतिभारेण (सौन्दर्यस्य) आनमति तस्याः विसरतां रोचिषां गुणत्वेन रूपणं । तत्र आलंबिनी विधुशिलापात्रे इव गण्डौ लक्ष्येते तयोः सुमधनुः = मन्मथ एव नाडिंधमः = स्वर्णकारः एतासां अङ्गेषु विद्यमानं सौन्दर्यं तुलयन् सन् निदधाति किमित्युत्प्रेक्षा ।

धत्ते स्मरः [1]कुचधरावधिनाभि गूढो
रोमालिकान्ति[2]करशाखिकया किमासाम् ॥ २७ ॥

निर्मातुं नहि शक्यते करतलैस्स्पृष्टा यतः स्याद्वपुः
क्रान्तान्निर्मिति[3]रम्बुजातवसतेर्यद्यप्यसौ मानसी ।
लोके विस्मरणं गुणो हि मनसस्तेनैव संदृश्यते
मध्ये निर्मितिविस्मृतिर्मृगदृशां बौद्धैकसिद्धान्तभूः ॥ २८ ॥

एतत्कुचाचलविनिर्गतरोमरेखा-
भृङ्गारनिर्झरनिरोधकृते[4]ऽङ्गजेन ।
मध्ये वलित्रयमिषेण निजाङ्कराज्य-
हेतोः क्रमा[5]दुपकृता इव सेतुबंधाः ॥ २९ ॥

एतद्वरोरुद्युतिचौर्यमन्तर्मुहुर्मुहुः किन्तु विचार्य मोचाः ।
कुर्वन्ति [6]सूनाञ्जलिमध्वगेभ्यः कृतापराधो न कुतो बिभेति ॥ ३० ॥

विहितौ विधिनैव जानुनी मुकुरौ किं रतिपञ्चबाणयोः ।
स्थिरपादसमञ्चितौ वधूवरजङ्घामणिदण्डमण्डितौ ॥ ३१ ॥

(समोहाश्चर्यम्)

अहो! सर्वथा चतुर एव सुमधन्वा ।

शरीरं सौन्दर्यप्रभवखनिरेका न वनिता
मनो मे तन्वेतत्तरलतरलं लेखनपदम् ।
अनालोकैरन्तर्निबिडतरमोहांधगहनं
स्वयं येनानङ्गोऽप्युपकरण[7]हीनोऽयमलिखत् ॥ ३२ ॥

(प्रविश्य)

माधवी— देवीए सत्ताजीए [8]एसा सासणपत्तिआ । [देव्याः सात्राजित्याः एषा शासनपत्रिका]

माधवः— (गृहीत्वा वाचयति)

दिअहे दिव्वइ तवणो सह णळिणीए तदो ण सुमरेइ ।
रअणीएवि तह विहू [9]सहाव एसो खु सअळपुरुसाणं ॥ ३३ ॥
[दिवसे दीव्यति तपनस्सह नलिन्या ततो न स्मरति ।
रजन्यापि तथा विधुस्स्वभाव एष खलु सकलपुरुषाणाम् ॥]

---

1. कुचधरौ-कुचपर्वतौ "अहार्यधरपर्वताः" इत्यमरः । 2. करशाखिका = अङ्गुलिः । 3. अम्बुजातवसतेः = चतुर्मुखस्य । 4. अङ्गजेन = मन्मथेन । 5. उपहृताः इति पाठान्तरम् । 6. सूनाञ्जलिं = पुष्पाञ्जलिं 7. शून्योयमालिखत् क पाठः । 8. क मातृकायां नास्ति । 9. एस सहावो हि णिहिळपुरुसाणं इति 'ख' पाठः ।

माधवी--देव ! अवि गहिदो भावो ? गहिअ देवो पमाणं । [देव ! अपि गृहीतो भावः ? गृहीत्वा देवः प्रमाणम्]

माधवः- पारिजातपादपानयनं विस्मृतमिति स्मारयति ।

(प्रविश्य)

मालती—देव ! देवी आअच्छइ । [देव ! देवी आगच्छति]

(सर्वे उत्तिष्ठन्ति)

(ततः प्रविशति सत्यभामा)

सत्यभामा - दिअहे दिव्वइ तवणो सह णलिणीए तदो ण सुमरेइ ।
रअणीएवि तह विहू सहाव एसो खु सअळ[1]पुरुसाणं ॥
महुरमहुरभणिदीओ जाव सकज्जम्मि साहआ होंति ।
चिठ्ठन्ति मुग्धसविहे एषा पकिदी णु अण्णपुठ्ठाणं ॥ ३४ ॥
[मधुरमधुरभणितयः यावत्स्वकार्ये साधका भवन्ति ।
तिष्ठन्ति मुग्धसन्निधे एषा प्रकृतिः खल्वन्यपुष्टानाम् ॥]

माधवः - देवि ! अनतिक्रमणीयाः खल्वार्यमिश्राः ।

सत्य— तं एव्व महंतो अंतराओ । गमिस्सं दाव घरअं । [स एव महानन्तरायः । गमिष्यामि तावद्गृहम्]

माधवः — देवि ! मा मैवम् । सैव मया नरकनिधनानान्दिता मदितिमानन्दय कुण्डलाभ्याम् । कः कोऽत्र भोः ?

(प्रविश्य)

दौवारिकः - जेदु देवो । [जयतु देवः]

माधवः - प्रद्युम्नसात्यकिप्रभृतयस्सैनिकास्समारूढनौकास्सर्वे पुरतश्चलन्तु । वधूसनाथस्य ममाप्य-चिरादेव नौरानीयतां प्राग्ज्योतिषगमनाय, [2] विदूषकश्च ।

दौवारिकः–तह । [तथा] (इति निष्क्रान्तः)

(प्रविश्य)

विदूषकः-ही ! ही ! देवत्थं भरदा दुवारे समुद्दतीरे देवस्स अत्तकोसळं दंसेदुं चिठ्ठंति । पुरेव्व थंभग्गगओवि कोवि चिठ्ठइ । महंतो हि मे अहिळासो थंभणट्ठं देठ्ठुं । झत्ति देवो पसीदेउ ।
[ही ! ही ! देवार्थं भरता द्वारि समुद्रतीरे देवस्य आत्मकौशलं दर्शयितुं तिष्ठन्ति । पुरेव स्तंभाग्रगतोऽपि कोऽपि तिष्ठति । महान् हि मे अभिलाषः स्तंभनाट्यं द्रष्टुम् । झटिति देवः प्रसीदतु]

---

1. पुरिसाणं-ख पाठः । 2. "वसन्तकश्च" इत्युचितः पाठः ।

माधवः--(सत्यभामां प्रति अपवार्य) 'नाविकाः' इति नायज्ञानाति स्तंभाग्रगता नौकागमीति[1] च । तदप्यनुकूलमेव । (प्रकाशं) ममापि महानभिलाषः (इति विदूषकं हस्ते गृहीत्वा भ्रूसंज्ञया सर्वानामन्त्र्य देव्या सह नौकारोहणमाभिनयति)

सत्य-- वसंतअ ! पेक्ख दाव भरदाणं थंभविज्जापंडिच्चं [वसन्तक ! पश्य तावद्भरतानां स्तंभविद्यापाण्डित्यम्]

विदू-- (इतस्ततः पश्यति)

माधवः- भो भो विचित्रभरताः ! क्रियतां प्रारिप्सितप्रस्तावना ।

नाविकाः-तह [तथा]

(इत्यरित्राण्युद्धृत्य वातनिरोधपटीमुपरि बध्नन्ति)

विदू— (सभयोत्कंपं) देव ! रक्ख ! रक्ख !! कोवि पुरो मुहरज्जूए विअ कड्डि(ढि)ऊणणेदि, पच्छा गव्लहत्थिआए विअ ईरअइ । [देव ! रक्ष ! रक्ष !! कोऽपि पुरो मुखरज्ज्वेव (कृष्ट्वा नयति) । पश्चात् गळहस्तिकयेव ईर्यते]

माधवः--- सखे ! नायं नटनस्तंभः । किन्तु नौकेयम् । अस्या वेग एव व्यामोहयति ।

विदू— पुरव्व एव्वंत्ति णो भणिदं । [पुरैव एवमिति न भणितम्]

माधवः— सखे ! [2] सखिवचनानुरोध एवात्रापराध्यति ।

विदू— होदु, कुदो दाणिं गमअइ ? [भवतु, कुत इदानीं गम्यते ?]

माधवः— प्राग्ज्योतिषनगरं प्रति; यत्र खलु नरको नाम दानवः । तद्वधाय प्रस्थिता वयम् । येन निर्जित्य निर्जरानदित्याः कुण्डले हृते ।

विदू-- (सभयोत्कंपं) संजमणित्ति भणिदव्वं । महंतो खु सो दुट्ठदाणवो । (उपरि पश्यन्) णखु णखु । सो दुट्ठो वा अण्णो वा होदु । मह किं करिस्सइ ? जीवंतस्सखु सो विआरो । [3]जं तिमितिमिंगिळाणं आहारीकिदोह्मि । पेक्ख !

गाढेहिं तिमिरेहिं आसु गहिदं सव्वं णहब्भतर

सुण्णो झत्ति मणोगई गअणदो अत्थाअळं चुंबइ ।

एसो सो अवि ठावरो सअमिदो अब्भेइ अत्थाअळो

दासीए अवि पुत्तओ जळणिही सुण्णो अगाहो जळे ॥ २५ ॥

[(सभयोत्कंपं) संयमनीति भणितव्यम् । महान् खलु स दुष्टदानवः । (उपरि पश्यन्) न खलु न खलु । स दुष्टो वा अन्यो वा भवतु । मम किं करिष्यति ? जीवतः खलु स विचारः । यत् तिमितिमिंगिलानां आहारीकृतोऽस्मि । पश्य !

1. गमी = गमनकर्ता । 2. सखीवचन इति पाठान्तरम् । 3. जण्णिमिव्वं-ख पाठः ।

गाढैस्तिमिरैराशु गृहीतं सर्वं नभोऽभ्यन्तरं
सूर्यो झटिति मनोगतिर्गगनतोऽस्ताचलं चुंबति ।
एष सोऽपि स्थावरस्स्वयमितोऽभ्रत्यस्ताचलो
दास्या अपि पुत्रको जलनिधिश्शून्योऽगाधो जले ॥

माधवः— (स्मितं कृत्वा) अयमपि नात्र एव वेगातिशयः । पश्य पश्य !

प्राक्समीरपरिचोदितापि नौर्लक्ष्यते किल निवर्तनोन्मुखी ।
मारुतैरभिमुखागतै रया त्तिर्यगाकुलित[1]केतनांशुकैः ॥ ३६ ॥

सत्य— पच्छामज्झे जळणिहि[2] महाभंगवीहीविभग्गा
णोआ एसा मिळइ ण उणो पेक्ख दाणिं विदूरे ।
जाणंती दे परुसपरुसं पुव्वमुत्तत्थवेअं
भूओ दाउं विअ तुह जळे मग्गमब्भाअअस्स ॥ ३७ ॥
[पश्चान्मध्ये जलनिधिमहाभंगवीथीविभग्ना
नौका एषा मिलति न पुनः पश्येदानीं विदूरे ।
जानन्ती ते परुषपरुषं पूर्वमुक्तास्त्रवेगं
भूयो दातुमिव तव जले मार्गमभ्यागतस्य ॥]

नाविकाः— आवत्ताणं चइदचइदा दंसणादो महंता
णक्का चक्कं सुमरिअ महापावआदोवि रूक्खं ।
णोआणं णो गमणविहर्दिं णो जळे आवहंते
कारुण्णादो तुह गअभआ णाविआ चक्कपाणी! ॥ ३८ ॥
[आवर्तानां चकितचकिता दर्शनान्महान्तो
नक्राश्चक्रं स्मृत्वा महापावकादपि रूक्षम् ।
नौकानां नो गमनविहर्तिं नो जले आवहन्ते
कारुण्यात्तव गतभया नाविकाश्चक्रपाणे !]

विदू— (सभयसंभ्रमं) देव ! रक्ख ! रक्ख !! एसो सो दुट्ठदाणवो । [देव ! रक्ष ! रक्ष !! एष स दुष्टदानवः]

माधवः— नायं दैत्यो नवजलधरश्यामळश्शैलराजो
नासौ चापो वलयिततटित्काननं, नैव मौलिः ।

---

1. केतनाळकैः-क पाठः । 2. महाभंगाः = महातरंगाः तेषां वीथी = पंक्तिः ।

नानाधातुच्छुरितशिखरं, नैव हारा झरिण्यो
नास्फोटोऽयं कुहरविहरत्केसरिप्रौढनादः ॥ ३९ ॥

(सत्यभामां प्रति)

अत्र हि, चक्रं [1]नक्रक्रकचदर[2]मुत्कृत्तदुष्कृत्यकृत्यं
कल्पानल्पद्युमणिकिरणद्योतितद्योदिगन्तम् ।
प्रादुर्भूतं त्रिदशपरिपत्साध्वसध्वंसहेतु-
र्विद्युन्मालावलयमिव मे भाति बाहांवुवाहे ॥ ४० ॥

पश्य! पश्य!! अतो नातिदूरे,

[3]करटिकिटीन्द्रसान्द्रविकटाग्रतटीविटपि-
त्रुटितघनाघनस्तनितसंक्षुभिताभ्रपथः ।
सुतनु पुरा वराहरदनाग्रसमुद्धृतभू-
रिव कुशमूल एष धुरि भाति वराहगिरिः ॥ ४१ ॥

अस्यैव शिखरे,

एषा वेषानुरूपायुधधरविविधायोधनोन्मत्तयोधा
सौधाशन्या समिन्धे सुतनु! समधटा चित्रकर्या नगर्या ।
तुङ्गैः प्राकारशृङ्गैः स्तबकितगगना रुद्धरुद्धाभ्र[4]भृङ्गै-
र्दैतेयव्यूहशङ्कावहघननिवहैस्सा पुरी दानवेन्दोः ॥ ४२ ॥

सर्वथा समाचरितं नारदेन पैशुन्यम् । यतः,

आकर्ण्योत्कर्णमर्णोनिधिघननिनदोद्दण्डताकुण्ठकण्ठै-
श्चण्डैर्ब्रह्माण्डभाण्डत्रुटनपटुतराभीतकण्ठीरवेन्द्रैः ।
कूजद्भिर्मांसळश्रीः कुहरवसतिभिर्युद्धसन्नाहभेरी
दैतेयैस्ताड्यतेऽसौ दलितगिरिगलद्ग्रावसंरुद्धमार्गा ॥ ४३ ॥

अतो वयमप्येतदुपवनेषु विगताध्वश्रमा युद्धसन्नद्धा भवामः । (नाविकानालोक्य) [5]नौकां सुदूरमपनीय विश्राम्यताम् ।

(इति यथोचितं निष्क्रान्तास्सर्वे)

तृतीयोऽङ्कः ॥

---

1. नक्रक्रकचदरं = नक्रस्य (कर्तने) क्रकचवदाचरन्ति अराणि यस्य तत् । 2. उत्कृत्ताः दुष्कृत्यकृत्याः अकार्यकारिणः प्रतिपक्षिणः येन तत् । 3. करटीन्द्राः = गजेन्द्राः । किटीन्द्राः = वराहश्रेष्ठाः । तैः सान्द्रा या विकटा अग्रतटी, तत्रत्यैः विटपिभिः = वृक्षैः त्रुटिताः = छिन्ना ये घनाघनाः = वर्षुकमेघाः तेषां स्तनितेन संक्षुभितः अभ्रपथो येन सः इति बहुव्रीहिः । 4. गङ्गैः—इति पाठान्तरम् 5. नौकाः—इति पाठान्तरम् ।

तनातना — प्रणामकृत् । प्रणामभाक् ॥

तनतान — अवनम्र । उपसेवि । प्रणिपाति ॥

तनताना — नतिजाग्रत् ॥

तानातान — सेवारंभि । सेवोत्कण्ठि । सेवाधुर्य । भक्त्यानम्र । भक्तिप्रह्व । नित्यानम्र । सेवादक्ष ॥

तानाताना — सेवाजाग्रत । सेवारज्यत् ॥

तनतन — अवनत । नतिपटु । कृतनति । नतिकर । नतिपर ॥

तनतना — अवनमत् । विनतिकृत् । प्रणतिकृत् । नमनकृत् । प्रणिपतत । विनतिभाक् । प्रणतिभाक् ॥

तनानातान — नमस्याधुर्य । नमस्यादक्ष । नमस्कुर्वाण । प्रणामारंभि । नतिप्रारम्भि ॥

तनानाताना — नमस्याजाग्रत् । सपर्यारज्यत् ॥

तनानातन — नमस्यापर । नमस्याकर । नमस्यापटु । सपर्यापर । सपर्याकर । सपर्यापटु । प्रणामोन्मुख । प्रणामोद्धुर । प्रणामोद्यत । प्रणामोत्सुक । प्रणामादृत ॥

तनातानना — नमस्कारकृत् ॥

ताननातान — सेवनारम्भि । सेवनोद्योगि । सन्ततानम्र ॥

ताननातन — सेवनोन्मुख । सेवनोद्धुर । सेवनोत्सुक । सेवनादृत ॥

ताननातना — सेवनोन्मदी । सन्ततानमत् ॥

तानानतान — आसेवमान । संसेवमान । सेवाधुरीण । सेवावितन्द्र । दत्तप्रणाम । कल्पप्रणाम । नित्यप्रणाम । भक्तिप्रणाम । अश्रान्तनम्र । नित्यावनम्र । सेवाभिलाषि । सेवैकतान ॥

तानानताना — सेवानुरज्यत् । आसेवनोद्यत् । संसेवनोद्यत् ॥

तानातनन — सेवानिरत । सेवाभिमुख । नित्यावनत । शश्वत्प्रणत । भक्तिप्रणत ॥

तानानतना — सेवाभिमनस् । नित्यावनमत् ॥

ताननताना — सेवनरज्यत ॥

ताननतन — सेवनपर । सेवनकर । सेवनपटु । सन्ततनत । नित्यविनत ॥

ताननतना — सन्ततनमत् । भक्तिविनमत ॥

तनानतान — कृतप्रणाम । प्रणामधुर्य । निषेवमाण । अजस्रनम्र ॥

तनानताना — प्रणामजाग्रत् । प्रणामरज्यत् ॥

तनानतन — अजस्रनत । प्रणामपर । प्रणामकर । प्रणामपटु । नतिप्रवण ॥

तनानतना — अजस्रनमत ॥
तननातान — नतिधौरेय । कृतसंसेव । नतिसन्धायि । सततानम्र ॥
तनतानन — नतिधूर्वह । कृतसेवन ॥
तननातना — प्रणिपातकृत । सुमनोन्मनस् । सततानमत ॥
तानानातान — सेवाधौरेय । सेवानिस्तन्द्र ॥
तानानातन — सेवातत्पर । सेवाधूर्वह । सेवालालस । सेवाकर्मठ । सेवासादर ॥
तानातानना — सेवासक्तधी । अश्रान्तानमत ॥
तननतान — सततनम्र । नतिधुरीण । विनतिधुर्य । प्रणतिधुर्य ॥
तननताना — विनतिजाग्रत । प्रणतिरञ्ज्यत ॥
तननतन — कृतविनति । कलितनति । रचितनति । विहितनति । नतिनिरत ॥
तननतना — सततनमत । अवनतिकृत ॥
तनातानताना— सपर्यानुरञ्ज्यत ॥
तनानातानानान—सपर्यादौ धौरेय ॥
तनानातानान — सपर्याधौरेय ॥

इति वन्दारुनामानि ॥

अथ पूजानामानि ॥

॥ पूजानमस्यापचितिरित्यादि ॥

ताना — सेवा । पूजा । अर्चा ॥
तन — नति ॥
तनाना — सपर्या । नमस्या । निनंसा ॥
तानना — पूजना । अर्चना । अर्हणा ॥
तानन — सेवन । पूजन । आनन । अर्हण । आनति । सन्नति । अंचन ॥
तनान — प्रणाम । विनाम । उपास्ति ॥
तानाना — आसेवा । संसेवा । शुश्रूषा ॥
तनन — विनति । प्रणति । नमन । भजन ॥
तनातान — नमस्कार ॥
तनाताना — नतिक्रीडा ॥
तानताना — नित्यसेवा ॥

तानातन — आसेवन । संसेवन । आराधन । अभ्यर्हण । अभ्यर्चन । सेवाविधि । सेवारस ॥
तानातना — आराधना । सेवाविधा । सेवाकला । पूजाविधा । अभ्यर्चना ॥
तानतन — नित्यनति ॥
तनातन — नमस्कृति । उपासन । निषेवण । सभाजन । नतिक्रम ॥
तनातना — नमस्क्रिया । पुरस्क्रिया । उपासना । नतिक्रिया ॥
तनतान — प्रणिपात । अवनाम । नतिकेळि । नतिकर्म ॥
तनताना — नतिकेळी । नतिलीला ॥
तानातान — सेवाकर्म । सेवाकेळि । सेवाचार ॥
तानाताना — सेवाकेळी ॥
तनतन — अवनति । नतिविधि । प्रणमन । विनमन ॥
तनतना — नतिकला । नतिविधा ॥

इति पूजानामानि ॥

अथ करणकेळीनामानि ॥

तान — कृत्य । कर्म । केळि । नर्म ॥
ताना — लीला । केळी । क्रीडा ॥
तन — विधि । क्रम ॥
तना — कला । क्रिया । विधा ॥
तानना — कल्पना । गुम्भना । केळिका ॥
तानान — सन्धान । निर्माण । आचार । व्यापार ॥
तानन — कल्पन । निर्मिति । विभ्रम । कौशल ॥
तनान — विधान । विलास ॥
तनना — कलना । रचना । घटना ॥
तनन — कलन । रचन । घटन ॥

इति करणकेळीनामानि ॥

अथ समर्थनामानि ॥

तान — दक्ष । धीर । सज्य । प्रौढ । उत्क । निघ्न । धुर्य । शक्त । व्यग्र । चण्ड ॥
ताना — जाग्रत् रज्यत् ॥ ।

तन — पटु । क्षम । प्रभु । पर । कृति । चण । व्रति ॥
तनाना — पटीयस् । व्यवस्यत् ॥
तानना — शक्तिमत् । प्रौढिमत् । निघ्नधी । निघ्नहृत् । सक्तधी । सक्तहृत् ॥
तानान — निष्णात । निस्तन्द्र । पारीण । धौरेय । आयत्त । सन्नद्ध । सन्नाहि । संरब्धि । संरम्भ । उद्युक्त । उद्योगि । निर्निद्र । उद्दण्ड । उन्निद्र । उच्चण्ड ॥
तानन — तत्पर । धूर्वह । दक्षिण । कर्मठ । पेशल । कोविद । पण्डित । व्यापृत । उत्सुक । उन्मुख । उद्यत । प्रोद्यत । उद्यमि । दीक्षित । निष्ठित । सादर । लम्पट । लालस । जाहलि । सम्भ्रम । कौतुकि ॥
तनान — प्रवीण । धुरीण । समर्थ । वितन्द्र । विनिद्र । अधीश । प्रगल्भ । पटिष्ठ । नदिष्ण । उदार । विदग्ध । विनोदि । सलील । प्रवृत्त । प्रचण्ड । अकुण्ठ । अभङ्ग ॥
ताना — संदृन्यत् ॥
तनन — निपुण । कुशल । चतुर । प्रवण । निरत । व्यसन । कुतुकि ॥
तनातान — निरालस्य । धृतोत्साह । समुद्युक्त । समारम्भि । अलम्भूष्णु । पराधीन ॥
तानातन — प्राज्ञानिक । पारायण । बद्धव्रत । क्षोदक्षम । निर्यन्त्रण । उच्छृङ्खल । अभ्युद्यत ॥
तानातना — प्रौढीभवत् । निस्तन्द्रधी । चातुर्यभाक् ॥
तानतन — जागरितृ ॥
तनातन — धुरंधर । विचक्षण । परायण । विशारद । समुत्सुक । समुद्यत । कृतोद्यम । अतन्द्रित । दृढव्रत । निरङ्कुश । विशृङ्खल । अकुण्ठित । अभङ्गुर । कृतादर । कुतूहल ॥
तनातना — प्रगल्भधी ॥
तनतान — परतन्त्र । उपनिद्र । प्रभविष्णु । अतिगल्भ । अतिकारि । दृढचित्त । अतिधीर ॥
तानातान — प्रौढीभूत । गाढोत्साह । बद्धोत्साह ॥
तनतन — कृतमुख । पटुतर । पटुतम । परवश । अभिमुख । अभिहित । अधिकृत । व्यवसित ॥
तनातान — पटूभवत् ॥

॥ श्रीः ॥

॥ प्रास्ताविकम् ॥

असर्वज्ञजनदुर्लभां काव्यसृष्टिं वदन्त्यभिज्ञाः । अपूर्वां पूर्वजन्मवासनां तत्र कारणीकुर्वन्ति केचित् । परे त्वनुकरणसाध्यां मत्वा पूर्वेषां महाकवीनां रसवन्ति पद्यानि समानार्थानुपूर्वीकैः पदैरनुकुर्वन्तस्तथैव च प्रबोधयन्त्यन्यान् । अपरे च "यमाते"त्यादि-गणविज्ञानेन गुरुलघुविवेकेन च विविधानि छन्दांसि निर्माय तदभ्यासवशात्सुसाध्यां मन्वते कविताम् । एवमनेकविधकविताभ्यासमार्गेषु सत्सु अयमपूर्वतरः परिश्रमः कृतः श्रीमद्वादीन्द्रकविमहाशयेन, यस्येयं निर्मितिः "कविकर्पटिका" ।

अस्यां कविकर्पटिकायां बहवः पद्यनिर्माणप्रकाराः प्रदर्शिताः । अनेनादृते मार्गे नानुकृतिरथवा गणादिगणनापरिश्रमः । किन्तु पद्यग्रथनानुकूलानि विशिष्टानुपूर्वीकाणि पदानि प्रतिवृत्तं प्रतिपादं दर्शयति कविः । तादृशानुपूर्वीकपदाभ्यासवशोत्पन्नश्लोकनिर्माणानुकूलधारावान् पण्डितः अन्यो वा सर्वत्र सर्वदा अनायासेन पद्यं निर्मातुं प्रभवेत् ।

तथैव च प्रतिजानाति कविर्ग्रन्थारम्भे—

"यत्नादिमां कण्ठगतां विधाय श्रुतोपदेशाद्विदितोपदेशः ।
अज्ञातशब्दार्थविनिश्चयोऽपि श्लोकं करोत्येव सभासु शीघ्रम् ॥" इति ।

अत्र ग्रन्थे उदाहरणत्वेन अनुष्टुप् , इन्द्रवज्रा, वंशस्थं, द्रुतविलम्बितं, वसन्ततिलका, मालिनी, शिखरिणी, मन्दाक्रान्ता, शार्दूलविक्रीडितं इति नव वृत्तान्युपात्तानि । पद्यनिर्माणोपयोगिपदप्रदर्शनमेवात्र प्रधानं वस्तु । अर्थविचारस्तु पाठकाधीनः ।

एतद्ग्रन्थोक्तरीत्या उपरिनिर्दिष्टेषु वृत्तेषूदाहरणत्वेनैकैकः श्लोकः प्रदर्श्यते । यथा—

१. अनुष्टुप् — Page No. 3.

कर्पूरपूरनीकाशा कान्तिर्यस्य विलोक्यते ।
चन्द्रोऽयं राजते रम्यो नितान्तं लोचनप्रियः ॥

२. इन्द्रवज्रा — Page No. 8.

धर्मप्रसिद्धः करुणाप्रधानः प्रजासु साधुः प्रथितः पृथिव्याम् ।
सुजातसख्यो विनयादिसिन्धुः जीयाद्भवान्प्रीतिकरो विशुद्धः ॥

३. वंशस्थवृत्तम् — Page No 9.

अनिन्दितेन्दीवरचारुलोचना
वितन्द्रचन्द्राभमुखाम्बुजद्युतिः ।
मृणाळनाळोपमबाहुवल्लरी
जगत्त्रयं मोहयते विलासिनी ॥

४. द्रुतविलम्बितम् — Page No. 10.

विशदशारदवारिदभास्वरं
चरति यस्य यशो भुवनत्रये ।
सकलवत्सलताक्रममन्दिरं
क्षितिपतिस्स सदा भुवि शोभते ॥

५. वसन्ततिलका — Page No. 10.

शोभासमुद्रसुभगो जगतीतलेऽस्मिन्
नीहारपाटनरुचा भुवने निकामम् ।
स्वाचारदाननिरतः प्रतिमः पुराणः
वारीशवाणिविभवैस्सखि मेऽद्य दृष्टः ॥

६. मालिनी — Page No 11.

नवसरसिजजालैस्सन्निभोऽयं सदैव
स्फुरति किरणराशिर्यस्य सम्प्रेक्षणीयः ।
जनपतिरुचिरौघैर्भास्करोऽयं पुरस्ता-
द्दधदुदयविनोदो निर्मितोऽयं विधात्रा ॥

७. शिखरिणी — Page No. 12.

महाशीलः श्लाघ्यो मदनविजयी निर्मलयशाः
स्फुरल्लीलाक्षेपो विगतकलुषस्तत्त्वनिपुणः ।

प्रशस्यस्सर्वेषां जलनिधिसमस्सत्पथरतः
महाशास्त्राभिज्ञो नरपतिरयं सर्वविजयी ॥

८. मन्दाक्रान्ता — Page No. 13.

प्रज्ञागण्यस्सुभगवदनः कीर्तिधौतत्रिलोकः
विश्वप्रेक्ष्यो विनयसहितो नीतिशास्त्रैकवेत्ता ।
सौख्याचारो बहुमतगतिश्चारुलब्धप्रतिष्ठः
दीर्घं जीयाद्गुणगणनिधिस्सर्वलोकोपकारी ॥

९. शार्दूलविक्रीडितम् — Page No 15.

प्रज्ञानां निजभूमिरेष नियतं संरक्तचित्तो जने
चन्द्राकारगुणप्रकाशसुभगो दानेन कर्णोपमः ।
कीर्त्योल्लङ्घितसप्तवारिधिपया विद्याविनोदी स्वयं
शक्त्या निर्जितसारशत्रुनिवहो जीयादयं भूपतिः ॥

अस्मिन् सरस्वतीमहाल् ग्रन्थालये विद्यमानासु चतसृषु मातृकासु मध्ये B. 4782 (D. 3754) संख्यातायां मातृकायां ग्रन्थकर्तृनाम "वागिन्द्रकविः" इति दृश्यते। B. 5010 (D. 3756) संख्यातायां मातृकायां ग्रन्थकर्तृनाम न लभ्यते । उपरितनमातृकाद्वयादितरस्मिन् मातृकाद्वये (B. 4783, B. 5009) कर्तृनाम "वादीन्द्रकविः" इत्येव दृश्यते । अतोऽत्र ग्रन्थकर्तृनाम "वादीन्द्रकविः" इत्येव स्वीकृतम् । मातृकाचतुष्टयेऽपि प्रतिपाद्यविषये न कोपि भेदः ।

एतद्ग्रन्थालयस्थमातृकासूचीपत्रे (षष्ठविभागे) (Descriptive Catalogue of The Sanskrit Manuscripts in the T. M. S. S. M. Library, Tanjore, Vol. VI) (D. 3753) B. 4783 संख्यातमातृकाविवरणप्रस्तावे चैवं दृश्यते —

Remarks:—The MS. is in good condition. The name of the author is given in this MS as Vādīndra and in the next MS. No. 3754 it is given as Vāgindra. The work brings together a number of words which can easily fit into verse composition. These phrases will be a valuble aid to any one who wishes to indulge in versification.

अस्य कवेः कालनिर्णयविषये कृतः प्रयत्नः विफलोऽभूत् । कदा कुत्रासीदित्यादि निर्णेतुं न पार्यते ।

महदिदन्तु प्रमोदस्थानं यदयं "कविकर्पटिका" ग्रन्थः (B. 5010) तीर्थयात्राप्रसङ्गेन काशीं गतेन श्रीमन्महाराजतञ्जापुराधीश्वर श्रीशरभेन्द्रभूमिपालेन (A. D. 1798-1832) एतद्ग्रन्थालयपरिपोषकाग्रगण्येन काश्यां परिक्रीतः । स चायमंशः ग्रन्थस्योपर्येवं लिखितस्सन्दृश्यते महाराष्ट्रभाषायाम—'हे पुस्तक श्रीमन्तराज श्रीशरभोजीमहाराजसाहेबयांच्या कारकर्तींत काशीदेशाहून खरीदी करून आणिलें असें' ॥

एवंविधोत्तमग्रन्थसङ्कलनेन सारस्वतजगतो महदुपकृतवतः श्रीमन्महाराजश्रीशरभेन्द्रभूपालस्य विषये हार्दीं कृतज्ञतामाविष्कुर्वन्त इतो विरमामः ॥

कविकर्पटिका सेयं कविशार्दूलनिर्मिता ।
मोदाय विदुषां नित्यं जीयादाचन्द्रतारकम् ॥

इति शम् ।

वि. सुन्दरशर्मा ।
नावलपाक्कं श्री देवनाथाचार्यः ।

OUR EXCHANGES.

1. The Indian P. E. N. Bombay.
2. The Divine Life, Sivananda Nagar, Rishikesh, U. P.
3. Mysore Information Bulletin, Govt. of Mysore.
4. Madras Information, Govt. of Madras.
5. The Journal of Oriental Research, Madras.
6. The Journal of University of Bombay.
7. Bulletin of the Govt. Oriental Manuscripts Library, Madras.
8. American Newsfile of the U. S. Information Service.
9. The Journal of the Travancore University Oriental MSS. Library.
10. Agra University Journal of Research, Agra.
11. Tirumalai Tirupathi Devasthanam—Monthly Bulletin.
12. Commonwealth Today.
13. Fortnightly Review of News and Events of the British Information Service.
14. Journal of the Annamalai University, Annamalainagar.
15. The Adyar Library Bulletin, Adyar, Madras—20.
16. Journal of Sri Venkateswara Oriental Institute, Tirupathi.
17. Journal of the Oriental Institute, Baroda.
18. Britain Today.
19. Annals of the B. O. R. Institute, Poona—4.
20. Sen Tamil. (Tamil) Madurai Tamil Sangam, Madurai.
21. Gnanasambandam. (Tamil) Dharmapuram.
22. Tamil Pozil. (Tamil) Karanthai Tamil Sangam, Tanjore.
23. Vaidya Chandrika. (Tamil) Teppakulam, Trichy.
24. Eeelakesari, Ceylon. (Tamil)
25. American Reporter—Tamil and English Editions.
26. Vijayavani—(Telugu) Vijayawada.
27. Kinnera. (Telugu Monthly) 16, Jones St., Madras-1.
28. Traimasik—Bharata Ithihasa Samshodhak Mandal, Poona.
29. Samshodhak, Rajwade Samsodhan Mandir, Dhulia.
30. Quarterly Journal of the Mythic Society, Bangalore.
31. Jaina Siddhantha Bhaskar & Antiquary, Arrah (Bihar).
32. Udyana Patrika, Tiruvaiyaru, Tanjore Dt.
33. UNESCO Bulletin for Libraries.
34. Dharma Chakram, Sri Rama Krishna Tapovanam.

35. Matru Seva, (Telugu weekly) Tondiarpet, Madras—21.
36. Sutantiran (Tamil weekly) Colombo.
37. Bulletin of the Ramakrishna Mission Institute of Culture, Calcutta.
38. The Indo-Asian Culture, Pataudi House, New Delhi-1.
39. Sri Ramakrishna Vijayam, Sri Ramakrishna Matam, Madras-4.
40. News Bulletin, Embassy of the People's Republic of China, New Delhi.
41. News from Yugoslavia, Yugoslav Embassy, 13, Sundaranagar, New Delhi.
42. SOCIÉTÉ ASIATIQUE, 1, Rue de Seine, PARIS. (VIe)

श्रीशिवपादकमलरेणुसहस्रे

अथ कुसुमपद्धतिः ॥

...नटदिन्दुशेखरवधूवक्त्रारविन्दोल्लस-
द्धोटीसौरभसारिणीप्रतिपदोत्सिक्ता स्वयं
सूक्तयः ।
निर्गच्छन्तु निसर्गवेगविजितस्वर्लोककल्लोलिनी-
गर्वा शर्वपदारविन्दरजसां स्तोत्राय वक्त्रा-
न्मम ॥ १ ॥

ऊरीकरोति शरदिन्दुमरीचिगौरा
चन्द्रावतंसचरणाब्जपरागपाळिः ।
बाणेन भक्तिनमितेन समर्पितस्य
द्रोणप्रसूननिचयस्य परागभङ्गीम् ॥ २ ॥

विलुम्पन्तु स्वैरं विषमशरजेतुश्चरणयोः
परागाः स्वच्छन्दं तिमिरभरमन्तस्समुदितम् ।
जटाचन्द्रज्योत्स्नाकिसलयसुधाविन्दुशकलै-
र्दधानास्साधर्म्यं दळितलवलीरेणुभिरपि ॥ ३

नित्यं नखेन्दुकिरणैरभिजृम्भमाणे
श्रीवीनसूक्तिजलधौ पदसीम्नि लग्ने ।
उद्गच्छतस्सुरतरोस्सुमनःपरागै-
रौपम्यमावहति शम्भुपदाब्जरेणुः ॥ ४ ॥

चरणनलिनसीमास्वन्वहं वर्धमाना
नखरुचिरससिक्ता पांसुरेखा शिवाङ्घ्र्योः ।
सुगुणसुरभिताशा प्रेमकोशो मुनीना-
मनुनयति परागैस्तुल्यतां पुष्पपङ्क्तेः ॥ ५ ॥

प्रणतेषु सुपर्वसुन्दरीणा-
मवतंसोत्पलवासिता त्वमेव ।
फणिभूषणपादपांसुरेखे
परमाम्नायवितानपुष्पमाला ॥ ६ ॥

कुवलासखण्ड ... ेः
...ंस...

पदपङ्कजसम्भवं नखाळी-
नवकद्रोणपरागसामरस्यम् ॥ ७ ॥

पदपङ्कजपांसवः पुरारे-
र्धवळिम्ना प्रथयन्ति सौमनस्यम् ।
प्रथिते मुखचुम्बने मृडान्याः
कबरीनिस्सृतकैतकैः परागैः ॥ ८ ॥

प्रमथाधिनाथपदपांसुमण्डली
प्रकटीकरोति पुरशासने पुरा ।
रतिनाथमुक्तनवकेतकीशर-
प्रसरत्परागसुषुमासमुन्नतिम् ॥ ९ ॥

शैलादिना परमभक्तिभरेण दत्तां
धृत्वा गळे कनकपुष्पविराजिमालाम् ।
स्वैरं शिवे नटति तद्भ्रमसप्रनुन्ना
तद्धूळिरेव शिवपादपरागरेखा ॥ १० ॥

चरति श्रुतिमौळिकाननान्ते
चरणाम्भोरुहसङ्गतानि शम्भोः ।
खलु वीतरजांसि कानि चाङ्घ्र्योः
स्फुटमुद्दामकदम्बकोरकाणाम् ॥ ११ ॥

सर्वासु देववनितासु सतीमुखासु
भक्त्या नतासु पदयोर्विधुखण्डमौळेः ।
श्वासोद्गमैर्निपतिता पदपांसुरेखे
माल्यश्रियं त्वमयसे मकुटस्थलीषु ॥ १२ ॥

किं वा ब्रूमस्सुकृतविभवं पांसुरेखे भवत्या-
स्त्वत्तोऽप्यन्यं जगति परमं वस्तु नैवास्ति
किञ्चित् ।
सेवारम्भे त्रिपुरजयिनश्चामराग्रादुदीता
ब्रह्मेन्द्राद्यैरपि च शिरसा माल्यवत्पाल्यसे
त्वम् ॥ १३ ॥

वीथीषु वेदतुरगस्य विहारकाले
पादोत्थिता त्वमसि पावनि पांसुरेखे ।
सेवासमुत्सुकधियां सुरसुन्दरीणां
बाह्यं प्रसूनजरजः करकुड्मलानाम् ॥ १४ ॥

पादारविन्दयुगळात्प्रमथाधिनेतुः
पांसो पिबन्मधुझरीं ननु वर्धसे त्वम् ।
केनापि तेन सुकृतेन मुदाभवन्तं
जिघ्रन्ति संयमिमनोमयचञ्चरीकाः ॥ १५ ॥

प्रणतिषु परशम्भोः प्रांशुभिः पांसुभेदैः
पदकमलनिदानैः प्राप्तरेणुप्रसङ्गः ।
किसलयकुसुमश्रीमौक्तिकैः पद्मरागैः
प्रणमदमरमौळेर्मौळिमन्दारशाखी ॥ १६ ॥

सक्तानि गण्डफलकेषु सुधांशुमौळेः
क्रीडासु दारुवनसंयमिकामिनीनाम् ।
नूनं रजांसि पदयोस्समतां भजन्ते
व्याकोचकैतकदळप्रसरत्परागैः ॥ १७ ॥

शुद्धान्तकेळिरसिके शशिखण्डमौळौ
पर्यन्तसीम्नि रहसि प्रतिवारमेव ।
माल्यैर्विना मदनसूदनपादपांसो
तत्कालजं श्रमभरं तनुतामनैषीः ॥ १८ ॥

पदसरोरुहपांसुपरम्परा
पुरहरस्य तनोति मतिं सताम् ।
चरणचिह्नसरोरुहगर्भत-
स्समुदितस्फुटरेणुसमुन्नतेः ॥ १९ ॥

नतस्य शम्भोश्चरणारविन्दे
नाथस्य नित्यं नगराजजायाः ।
आसीस्त्वमाद्या हरपादरेणो
मन्दारमाला मधुसूदनस्य ॥ २० ॥

पुष्णाति पादसरसीरुहपांसुरेखा
पाण्डुच्छविर्भगवतस्त्रिपुरां निहन्तुः ।
पादाम्बुजे प्रणयिनि श्रुतिभिस्सहर्षं
क्षिप्तस्वयंवरणकौतकमालय...

रम्याणि कानि पदप...
यालोत्सवे निपततश्चर...
कुर्वन्ति वृत्तदमनस्य दृशां सह...
भूयः परागसुभगां नवपद्ममाल...

कल्पद्रुमस्य महतः कमलारिमौळेः
पादद्वयं कलयते नवमञ्जरीत्वम् ।
पादारविन्दजपराग भवान्किलासी-
त्तत्रस्थिता नवपरागततिस्समग्रा ॥ २२ ॥

सञ्चारमाकलयति द्विजराजमौळा-
वग्रेस्थितिप्रणयिनो नमतां सुराणाम् ।
सम्पूर्यते समुदितैः पदपांसुजालै-
र्नाभीसरोजमधिकं नळिनेक्षणस्य ॥ २४ ॥

नमदमरकिरीटकान्तिपूरे
करतलसम्पुटसञ्चयैस्सपक्षे ।
रचयति शिवपादपांसुरेखा
मतिमिह कौसुमरेणुभिस्समृद्धैः ॥ २५ ॥

चिरस्थिताः काञ्चनपांसुरेखा-
श्शिवाङ्घ्रिपद्मस्य चिराय नूनम् ।
चिद्वल्लिकायाश्शमवज्जनानां
प्रसूनलक्ष्मीं सुवते प्रकामम् ॥ २६ ॥

भास्वत्प्रकाशमहिता
पटुतरहंसाळिजीवनालम्बा ।
पादाब्जरेणुपङ्क्ति-
र्भजते परमस्य पद्मिनीभावम् ॥ २७ ॥

पराग पादाब्जयुगस्य शम्भो-
रुपासनीयस्त्वमिहामरेन्द्रैः ।
सम्मानयन्ते शिरसा यतस्त्वां
मालामिवामी मकुटोपकण्ठे ॥ २८ ॥

शोणैः परागैश्चरणारविन्दे
हन्तुः पुरां नूनम ...ङ्क्ष्येते ।
...